# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – फलितज्योतिषम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – बृहत्पाराशरहोराशास्त्रम् (उत्तरार्द्धम्)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ करणं बिन्दुवत्प्रोक्तं स्थानं रेखा तथोच्यते।
सदसत्फलदं ज्ञेयं स्थानं च करणं बुधैः॥

२ तनुस्वायुस्त्रिरिष्फेषु पञ्च कामे सुखेऽर्णवाः।
अरौ भाग्ये त्रयः पुत्रे षट् करौ खे भवे च भूः॥

३ मनोबुद्धप्रसादश्च मातृचिन्ता मृगाङ्कतः।
भ्रातृसत्त्वं गुणं भूमिं भौमेन तु विचिन्तयेत्॥

४ रवावग्निप्रकृतिकः चन्द्रेऽम्बुप्रकृतिर्भवेत्।
खेटाः स्वभुक्तौ भूतोत्थां बोधयन्ति निजां प्रभाम्॥

**प्रश्नः २** पञ्चमहापुरुषलक्षणं प्रदर्शयत।

**प्रश्नः ३** पञ्चभूतफलाध्यायस्य सारांशं लिखत।

**प्रश्नः ४** उत्तम-मध्यम-अधमपुरुषाणां लक्षणं निरूपयत।

**प्रश्नः ५** प्रव्रज्यायोगान् लिखत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ शिवस्वर्णमयीं मूर्तिं यथाशक्ति विनिर्मिताम्।
शुभ्रस्रग्वसनोपेतां वृषारूढां मनोरमाम्॥
भाले बालेन्दुलसितां नेत्रत्रयविभूषिताम्।
वरप्रदामभयदां द्विभुजां पूजयेद् बुधः॥

२ यदि जन्म भवेत् पित्रोर्जन्मर्क्षे वापि सोदरे ।
मृतिस्तयोरथैकस्य वा भवेदिति निश्चितम् ॥
३ रवीन्दोर्ग्रहणं यत्र नक्षत्रे तदधीशजाम् ।
मूर्तिं स्वर्णमयीं सूर्यरूपं चापि रविग्रहे ॥
४ कलशोदकतो जातं दम्पती चाभिषिञ्चयेत् ।
आचार्यमभिवाद्याथ ब्राह्मणान् भोजयेत् सुधीः ॥
कर्मणोऽन्ते यथाशक्ति दद्याद् विप्राय दक्षिणाम् ।
एवं ग्रहणजातानां शुभदा शान्तिरीरिता ॥

**प्रश्नः ७** कृष्णचतुर्दशीजननशान्तिविधानं वर्णयत ।

**प्रश्नः ८** ग्रहणजातदोषशान्तिविधानं निरूपयत ।

**प्रश्नः ९** गण्डान्तोद्भवशान्तिविधानं निरूपयत ।

**प्रश्नः १०** मूलगण्डशान्तिविधानं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ बृहत्पाराशरहोराशास्त्रम् इति ग्रन्थः केन विरचितः ?
२ तनुभावः कः ?
३ गण्डान्तं कतिविधं भवति ?
४ आत्मनः विचारः केन ग्रहेण क्रियते ?
५ मातुः विचारः केन ग्रहेण क्रियते ?
६ करणस्य अपरं नाम किम् ?
७ स्थानस्य अपरं नाम किम् ?
८ सूर्यस्य कति रश्मयः सन्ति ?
९ चन्द्रस्य कति रश्मयः सन्ति ?
१० आकाशतत्त्वस्य अधिपतिः ग्रहः कः ?
११ पञ्चमहापुरुषाणां नामानि लिखत ।
१२ गण्डान्ततिथीनां नामानि लिखत ।
१३ गण्डान्तनक्षत्राणि कानि ?
१४ पूर्णिमायां कस्य ग्रहणं भवति ?
१५ अमावास्यायां कस्य ग्रहणं भवति ?

****